क्षाभवेच्छुक्रतुंगचलपर्ययोन्मितिः॥४८॥ ॥अस्यापि सूत्रत्रयस्यायमर्थः॥ एकदाशुक्रोदयकालेजलघटीयंत्रं प्रक्षिप्य
तनद्दश्यस्थानपर्यंतमुन्नतिंगतेतस्मिन्नुदयगतघटिकाजानास्यस्ताः किलस्वल्पेशेषाशुक्रस्योदयाताभवेत्॥ तदैवग्रहछाया
धिकारोक्तगत्यासितछायामानीयततोरविक्रणितेनोन्नतघटिकास्ताः किलभूगर्भगासिग्रहेणासितस्योदयाताभवंतिततो
योभ्रांतरंकृच्छिन्नलिप्तादिकमाऽसवएवस्युः॥ यतोवयंबहुदैर्घ्यंतिहितिजयोरादत्॥ तैः सममेवनोदितोसितंपश्या
मस्तितथाचतेनरासकृत्सिद्धांतेस्वस्वोदयाताद्भगर्भगघट्यातेमधिकमेव॥ ततोंतरानुपातेनसितशीघ्रोच्चस्यकक्षासाध्यते॥ य
दिसितकक्षयांतरासप्तभिः कुज्याकार्द्धयोजनानिभुक्तोनिशामानितदाकोराभ्रासप्तभिः कियंतीतिफलंशीघ्रोच्चकक्षायो
जनानि॥ ॥नन्वर्कभगणतुल्यपर्ययत्वेनसितस्यापितत्समकक्षत्वमेवसंभाव्यतेशीघ्रोच्चपर्ययाणांबहुत्वेनततोर्वी
ववहुविप्रलब्धत्वात्कथंशुक्रोच्चयातांतरानुपातेनतदुच्चकक्षासमानेतुमुचिताउभयोर्मिलनकक्षोपास्थितेचिरेणानदन्य
थातिप्रसंगइतिचेत्सत्यं। बुधशुक्रयोर्यैचलतुंगकक्षेनत्रतेरेवतयोर्भ्रमणंनयुनरादित्यकक्षायांपरंतुतत्रैवभ्रमतोस्त
योः पार्श्वपुरोगमनसाम्येनगतिवशात्पर्ययसाम्यमेवोपजायतइति॥ ॥अयमर्थः॥ ॥बुधस्यशुक्रस्यवाभवक्रीना
मंददृग्यांयावान्गतेरुपचयस्तावानेवोपचयस्तावानेवोपचयइत्यचिंतानुपपन्नंततोगदलतुल्यामध्यगतिः

सार्द्धमध्यगत्यापिपुनस्तुल्येवेत्यर्द्धमध्यगत्यैवस्वस्वचलतुंगकक्षायांपरिभ्रमतइति॥ तदुक्तंभास्कराचार्यैः॥ ॥उक्तं
तयोर्यैश्चलतुंगकक्षेतत्रैवतौचभ्रमतोर्द्धगत्येति॥ तथाचतयोर्द्धकक्षयानुपातात्तत्साध्यंनयुक्तमेवेतिपर्यवस्यति॥ ॥एवं
यत्परिज्ञातंयत्कक्षामानंतत्तुदैवसिकस्फुटकक्षामानमेव॥ तत्रयत्यूनमल्पत्वेनव्यवहारानुपयुक्तमितिमध्यमतत्सा
धनोपायमाहतन्मरुवइति॥ ततस्तथैवपर्ययपूरणावधिविचिंतनेयत्रदिनेकक्षायाः परमंमहत्त्वंयत्रचपरमाल्प
त्वंतदुभययोगदलतुल्यामध्यमासितशीघ्रोच्चकक्षाकक्षाध्यायेकथितंतेजोमयंगजगाजांबरसिद्धवेदै ४२५०८८ रि
त्यादिपठनेनोक्ताऽसकृत्सिद्धांतेषुदितिशादः॥ ॥नन्वत्रासितोच्चस्यपर्ययोपपत्तेरेवप्रतिज्ञातत्वेनतत्परिहारेण
कक्षायासाधनमनुचितंविरोधात्प्राक्तनिरूपितत्वेनपौनरुक्त्याद्धेयार्थाच्चेत्याशंक्यप्रहतोपयुक्तत्वमुपदर्शयन्ना
ह॥ ॥भाजितागतनकक्षेति॥ तयानंतरानीतयासितशीघ्रोच्चकक्षयास्वकक्षाविभाजिताफलमुच्चपर्ययाएवसंति
अत्रोपपत्तिः॥ स्वकक्षायांपरिभ्रमन्ग्रहः स्वशीघ्रतुल्यालिप्ताः कामन्नधिप्रत्याहमेतावंति २१८५८ नदाक्षाश्चीदु
मितानियोजनानिपर्ययेत्येवतत्कल्पपर्यंतंपरिसरन्यावंतियोजनानिक्रामतिपुनः स्वकक्षातु ५ त्यान्येवभयं
यतः स्वकक्षातुल्यान्येकपर्ययपूरणेनैवायमतिक्रामतीतिज्ञातेकल्पेपुनः स्वकक्षातुल्यानितः स्वकक्षास्वकक्ष

यावित्राजिनासतीष्टकेनस्यकल्पपर्ययाभवंतीत्यत्रकिंचित्रे॥ ॥अथोपायसाम्यादुपलब्धंक्रियाकलापमतिदिश्यइदानीं
ज्ञपर्ययानुपपाद्योपसंहारार्थमेकांस्थोऽतामाह॥ ॥एवमेववुधशीघ्रपर्ययानूसाध्येदितिरूढासनास्मृता॥मंदतुंग
स्यगतपर्ययाः पूर्वसूरिवचनेनसाध्याः॥४९॥ ॥येवारितेशीघ्रपर्ययोपपत्तिःसेवबुधशीघ्रपर्ययाणांमतीतिशा
स्त्रः॥उपसंहरतिइतिश्रुवासनेति॥अन्योपदर्शितप्रकारापेक्षयास्यदुरूहप्रकारेःस्यकल्पनयास्वल्पप्रयासादेवावगंतु
शक्यंतेपर्ययाइतिरूढपदमुन्नतं॥अथमंदोच्चपर्ययाणांएकैकस्ययुगवर्षै४३२००० रल्पपूर्णत्वेनपुरुषस्यायु
षोल्पत्वादसाध्यत्वेनतत्प्रतिपादकस्यागमस्यप्रामाण्यमनुमायतेषामपिप्रामाणिकत्वमित्यंतर्निधायपूर्वसूरिवचने
नेति॥ ॥अत्रचेदमनुमानं॥ ॥विमतोमंदोच्चपातपर्ययेपरागमः सोपपत्तिकाः अबाधितागमत्वादादित्योदिग
णप्रतिपादकागमवदिति॥किंचायमागमः प्रमाणंपरमादरापितामहप्रणीतत्वाद्देवदिति॥अत्रकेवलस्यागमस्य
नाहिज्योतिश्चिंतकैः प्रामाण्यमास्थीयतइतिलब्धावसरोमनोविलासासादितविशेषणासिद्धिसंभावनयाहेतोसंदिग्धासि श्री
द्धिमाशंकमानेयदिकश्चित्प्रत्यवतिष्ठेतूतदयंफलान्यथानुपपत्तिप्रसूतार्थापत्त्याःन्यक्षव्यतिरेक्यासिद्धालिंग्या २७
प्रतिबोधनीयइतिध्येयं॥ ॥एवमहर्गणस्यग्रहानयनस्योपजीव्यभूतमुपकरणजातमशेषंव्यवस्थाप्याधुना

ग्रहसाध्यंप्रधानंपूर्वमहर्गणमानेनुंडुतविलंबितत्रितयमेतदभिसंधत्ते॥ ॥गतिसमुद्भवयातसमागणस्तरणि
सिर्गुणितोगतमासयुक्॥स्वगुणसंगुणितःसतिथिःपृथक्निगदितोधिकमाससमाहतः॥५०॥इनदिनाप्तगता
धिकमासकैर्गगनवह्निगुणैःसहितैःपृथक्॥युगशरामरसाश्वरसाहतैःशशिदिनाप्तगतावमशोधितैः॥५१॥क
र्माणिमध्यमसावनमानजोदिनगणोरविवासरपूर्वकः॥क्षयदिनाधिकमासकशेषतोधिकतयारयंवेहिपरिस्फुटं॥
५२॥ ॥अत्रगतिसमुद्भवयातसमागणःतरणिसिर्गुणितःसन्गतमासयुक्कार्यइतियोजना॥गतेःसमुद्भवउपक्रमस्त
स्प्रभृतिकोयोयातसमानामतीतवर्षाणांगतःसमूहस्तरणीषिद्वीदग्गुणितःसन्मधुप्रभृतिकैर्गतमासैर्युगितियुक्तः
कर्त्तव्यइत्यर्थः॥एवंदेशांसिस्पष्टार्कस्यगतस्यकुदासायोनंगणितसमुद्भवेति॥कल्पगतोरविस्थितिविलंबिवर्षाविशोधय
पूर्वमेवोत्पादितोऽहर्गणोदहरणितःसंगुण्यचैत्रादिगतमासान्वर्तमानावधिकांस्तत्रसंयोजयेदितिशावः॥एवं
ज्ञानकर्मक्रियासंगुण्येष्टदिनावधिकारन्तिथीस्तत्रसंयोजयेत्यथेतिस्थानद्वयेसंस्थाप्यइत्यर्थः॥ततोनिगतैर्युगादिक
मासैरधःस्थितौसौगुणनीयौयुगसौरदिनैःप्रागुपदर्शितविधिना;फलमिष्टाधिमासाःतेपुनरस्त्रिघ्नासंगुण्यदिनी
कृताःसंतःपूर्वास्थितेष्टसौरदिनेषुसंयोजयेदिति॥ततोजातोयावानंकस्तंपुनःस्थानद्वयेसंस्थाप्ययुगस

मावमवासरैर्युगसंबंधिसावनदिनैर्गुणयित्वा युगचंद्रोहैर्विभाज्यफलमिष्टावमानितान्यपरित्यजेत्। शेषं
रविवासरैः पूर्वकोदिनगणः स्यादिति॥ किमत्र सौरैरैंदवः सावनो वेत्याशंक्याह ध्रुवमणेरादित्यस्य यन्मध्यमसावनं॥ ध्रु
मणेरादित्यस्य यन्मध्यमसावनं॥ इत्युपपद्यांतरमित्यादिना गोलउपदर्शितेनमानेनायमुपजायतइति॥ तदसं
देहोत्सारणायकर्तव्यतायां विशेषमुपदर्शयन्नाह॥ ॥ अधिकमासादिनक्षयेति॥ अधिकमासानयने ऽवमानयने
चतदवयवभूतमधिशेषदिनादिकमवशेषं वातन्नगत्वीयादित्यर्थः॥ ॥ अत्रोपपत्तिः॥ ॥ तत्रदिनगणो नाम ग
तिप्रवृत्तानिकालादिष्टदिनप्रत्ययाधिकानांरविसावनदिनानांगणः समुदायः सपवग्रहानयनोपयोगीतिसाध्य
ते॥ तत्रप्रथमंसावनानीमानात्मत्येकमंतरमधिमासावमरूपं संख्यायतेनसंस्कारेणपर्ययांतेकिल सावनानीतिभव
नीति॥ अतः सौराणामेवाहानुरोधात्प्रथममुपास्थितेनतेभ्योधिमाससंयोगद्वारा तावद्ध्रुवाहाः साध्यंते॥ तत्रप्रमाणे
ष्वयोः समजातीयत्वनियमेनगताब्दरूपाणीष्टवर्षाणीहादत्तानिः संगुण्यगतमासान्संयोज्यमासीकृतानितत्तः पु श्री
नस्त्रिंशतासंगुण्यदिनीकृतानि॥ तेचगताब्दसंबंधिनः सौरादिवसाक्रांतोयुगसौरचांद्राणामंतरमधिमासाएवेति॥ २१
प्रकृतसौराणामपिवारीकरणेधिमासदिनसंयोगएवोपायइतिमत्वादिनीकृत्येष्टादिवसाः सौरैर्युतसंयोजिताः॥

एवंकृतेगताब्दसंबंधिनस्तिथयइतिचांद्रोहर्गणोत्थः॥ ततः पुनरस्यापिग्रहसाधनानुपातानुपयोगित्वेनास्यसावनीकरण
मुपायांतरेण॥ तत्रापियुगर्तुतिथीनांसावनानांचांतरेऽवमदिनानि॥ यतोऽवमदिनतुल्येनांतरेणसावनेभ्यश्चांद्राण्यधिका
नीतितेभ्योवमदिनानिचेष्टैर्गुणितानिष्टंसावनाहारंभविष्यतइतिविचिंत्यगतावमसंसाधनायानुपातांतरंयदि
युगचांद्रैर्युगावमनुल्यमंतरंलभ्यतेतदनंतरानीतेनेष्टचंद्रोहर्गणेनकियंतीतिफलमिष्टावमानितानिचपृथ
क्स्थितेभ्यश्चांद्रेभ्योविशोधितानिनिः शेषंसावनेहर्गणाः स्यादिति॥ अतस्तथैवानयनसूत्रेगुणकारत्वंभाजकत्वं
चोपकल्पितं॥ ननुचास्याहर्गणस्यसावनत्वमुक्तं॥ तत्रप्रत्येकमपिग्रहाणांसावनसंज्ञाभेनकिमसिद्धायेणस्यतथात्वमि
त्याशंक्याह॥ ॥ ध्रुवमणेरादित्यस्ययदुदयद्वयांतररूपंमानाधिकारेसावनमुक्तं॥ तदसिद्धायेणे
वेत्यर्थः॥ अथतथापि॥ स्फुटसावनस्यप्रत्यहमन्यथाभावेनानियतत्वात्कथंतदसिद्धायकत्वमस्येत्याशंक्याह॥
मध्यमेति॥ स्फुटसावनस्यापूर्णपूरणावधियावानुपचयस्तावानेवोपचयइतितदर्थयोगदत्तुल्यंयन्मध्यमंसा
वनंतत्तुनियमेवेतितदसिद्धायिकत्वंकल्पनेदोषाभावादिति॥ ॥ ननुकल्पादिकाहर्गणस्यरविवासरपूर्वकत्वमेवम
स्त्वेवान्यत्रीयीतिगतिप्रवृत्तेग्रहनिकाहर्गणस्यकथंवासरनियमइत्याशंक्याह॥ रविवासरपूर्वकइतिकल्पादि

तोपि स्वल्पविलंबवर्षाणामस्मदुक्तगत्यार्द्धगणेक्षुते क्षुक्तिप्रवृत्तिदिनेपि रविवार एवमुपयातीति विप्रतिपन्नानामेकदृष्टि नामपि प्रक्लृप्तेनुमतिरेवेति किमनुपपन्नं॥ ॥ ननु नुपातस्य सर्वस्य सावयवतानियमेनाधिकमासस्य साधने वमदिनानयनं हेनुपू अवय तावशेषपरित्यागेनुचितः प्रक्रियाभंगप्रसंगादिति चेत्॥ सत्यमेवैतत्॥ तथापि तुल्यावयवफलकत्वोपलक्षणेन चतुरमतिभि राचार्यैर्गणितविद्यानैपुण्यद्योतनायक्रियागौरवोपसंहारप्रयोजनतयोक्तांशयंतेरणावयवस्य संक्रामितत्वेन तत्परित्यागात्॥ नचयथा॥ सौरार्द्धगणकल्पितद्वादशगुणितमासास्तिथ्यंतेत्यवकेतगतव्यक्तावधिकोजातस्ततोव्यक्तादग्रतएवशेष १५ दिनावधिकानि दिनानि संयोज्यानीतिवक्तास्थितेः तत्रचैत्रादयएवगतमासाः संयोजनीयाइत्यत्रक्रमश्चैत्रा प्रतिपदादेरेवतानि संयोजितानि भवंतीतिज्ञातमस्तेषांप्रतिपदादिनांतरभूतानांदिनामधिकत्वादिशोधनीयत्वमुपास्थि तेनतेनुपातादधिमासानयनेतदवयवभूतान्यधिशेषादिनान्यपिसंयोज्यानीतिस्थितंतत्रचैत्रादेरवधेः अधिशेषदिन तुल्येनैवांतरेणपुरतोंतरिनक्षत्रेविशेषक्षेपयोस्तुल्यत्वायोगात्तेनैवजातइतिमतिमतांतत्यागोयुक्तएवयाननुसरतेवं श्री तथान्यूनाहावशेषत्यागेकिंकारणमितिचेत्॥ उच्यते॥ सौरेष्वपिदिनसंयोगात्चांद्रत्वापत्तेरिति प्रत्यादरिष्टादि नावधिकास्तिथयएवजातास्ततः स्वस्यसावनेदिनोपयोगेनतेभ्यो वमदिनेषुविशोधितेष्वेवतानिसंयोज्यैतत्रावमदो २२

पशेषावयवविशोधनइष्टदिनीयतिथ्यंतावधिकान्येवसावनानिनपुनरिष्टादिनीयसूर्योदयावधिकानियतास्तिथ्यंतसूर्योदय योरंतरेवमशेषं॥ अतोरव्युदयकालिकानामेवग्रहाणांसिद्धांतेनावमशेषंत्यक्त्वोदर्कोदयकालावधिकान्येवकृता नीतिकिमयुक्तं॥ ॥ तदुक्तंभास्कराचार्यैः॥ ॥ तिथ्यंतसूर्योदययोस्तुल्यमध्यरविदैवतिष्ठत्यधिमासशेषं त्यक्त्वैनतेनोदयका लिकः स्यादित्यादिशेषप्राग्वोपपादितमितिसर्वमनुपपन्नं॥ ॥ ननुग्रहानयनमिहसावनमेवमानंकथमनुस्त्यार्द्धगणादु क्तंगौरवात्॥ सौरचांद्रयोः परित्यागेकारणाभावात्॥ अनुपातस्यनुतदानीप्रायिकलोपकल्पनोपि दोषाभावादिति चेत्॥ न॥ ग्रहादेरिष्टदेवसिद्धेष्टकालोपलक्षितेनलोकप्रसिद्धेनोदयतयातयोर्दिनाद्यवच्छिन्नव्यवहारानंगभूतेनेनरयुदयेनेसह संबंधाभावादनुपयुक्तत्वात्॥ तदारंभावसानयोरनियतत्वेनस्फुटोज्ञातुमशक्यत्वेनसौरस्यविपर्ययस्तत्वात्॥ सौरचांद्र योश्चव्यवहारोपक्षीणत्वात्तेदप्युक्तं॥ वर्षायनयुगपूर्वकमत्रसौरान्मासांस्तथाचतिथयस्तुल्यांशुमानात्॥ यत्तूच्यते तत्काचिच्चोदनास्तिनवासरायंतत्सावनादित्यादि॥ ॥ अथसप्तशेषवत्संस्कारकत्वेनशिष्यलोकोपकारायार्द्धगणोपपादितमूलतोपि संसूचयन्विक्रीडितवृत्तेनसंततिमेवंद्रढयतिश्लोकत्रयमन्यवधानाह॥ ॥ यानासौरसमागणोरविगुणश्चैत्रादिमासा न्विनास्तिथ्यंतःसतिथिर्भवंतिदिवसाः सौराःपृथक्स्वेस्वकृते॥ संसाध्यादिकमासकानहर्दिनमयैस्तैर्युतैःपृथस्वेगुणश्चां

स्याद्दनुपातजेः क्षयदिनैर्हीनोभवेत्सावनः ॥५३॥ स्यात्सौरचत्सरमुखंक्रियसंक्रमादौतच्चैत्रमासप्रभृत्यब्दयोर्विपरी
ष्ं॥ स्यक्तेनतेनरविवत्सरवत्कृतः स्याद्भगणस्तदधिकोपरथात्वशीहानू॥५४॥ न्यूनाहृतोषतुनिशीथमध्यतिथ्यतयोरं
तरगंसदैव॥ स्यक्तेनतेनेहनिशीतकालेदिवागणोस्माद्ग्रहसाधनंच॥५५॥ ॥एतच्छ्लोकत्रयमहर्गणानयनासमर्थ
त्वादुपेक्षितं॥ ॥एवंग्रहानयनेप्रथानीभूतमहर्गणस्यवक्ष्याम्याधुनायदर्थमेतावानायासस्तन्मध्यमग्रहानयनमेकेन
प्रतावित्तंबितेनोपदिशन्नाह॥ ॥भगणसंगुणितेष्टदिवागणःकुदिनलब्धदिवसैर्वलयादिकं॥ भवतिमध्यरवोरजनीदले
सतिदशाननपत्तनकेग्रहः॥५६॥ ॥भगणसंगुणितेष्टदिवागणोदिनलब्धदिवसैर्युगवर्षादिकंफलंसदशाननपत्तन
केग्रहोभवतीत्यन्वयः॥अत्रेविशेषादितिपदमध्याहर्तव्यं॥भगणैः संगुणितश्चासाविष्टदिवागणश्चस्तथाभूतः॥अ
यमर्थः॥अनंतरानीतमिष्टाहर्गणमिष्टग्रहभगणैः पुरापठितैः संगुण्यइलादिवसैर्युगाब्दादिनैर्विभजेत्फलंवलयादि
कोभगणादिर्दशाननपत्तनकेरावणराजधानीभूतायांलंकायांग्रहोरव्यादिरिष्टग्रहोभगणाराशीक्षागतिप्तावित्तिप्ता
दिनैः परिच्छिन्नोभोगआवर्तोवेदित्यर्थः॥अत्राभिधानप्राधान्यात्पूर्वपदपर्यायतयेलोपदस्यच ऋपदपर्यायतयाच ब
लोपपदप्रयोगइतिग्रहपदंचतत्सप्तम्यावारप्रवृत्तिप्रातिकेष्टदिनावधिकतत्कृतभोगपरमेवेतिमंतव्यं॥तथाचानी

श्री २३

तमहर्गणेनेष्टग्रहभगणेर्गुणितेयुगसावनदिनैर्भक्तेफलमतीतभगणाः ततोवशेषंद्वादशभिर्गुणयित्वापुनर्युग
भूदिनैर्भागेहरणेफलमतीतराश्यः ततः पुनरवशेषंत्रिंशतागुणितेभूदिनैर्भक्तेफलमतीतांशाः एवंषष्ट्यागु
णनादुक्तवल्लिप्तादिकमपि॥अत्रोपपत्तिरनुपातएव॥ सयथा॥ यदिसावनतुल्येनाहर्गणेनतत्कृतयुगभगणतु
ल्योभागस्तदेकनेनेष्टाहर्गणेनकिमितिफलमतीतोभगणादिर्ग्रहोभगइतिइछयागुणनप्रमाणेनभागादिकंपच्य
तेएव॥ ॥नन्वेवंतेमध्यायासनाभ्यांयेसिद्धपुरएवरवमध्येग्रहचारांशस्योक्तलेनेदानींग्रहानयनेनलंक्रादेश्चपुर
स्करणेपूर्वापरग्रंथविरोधइत्याशंक्याह॥ रजनीदलइति॥ रजनीदलंरात्र्यर्धकालः तात्कालिकेभ्रायंग्रहस्यादि
त्यर्थः॥ तथाचयोलंकादेशेरात्र्यर्धकालः सहिसिद्धिपुरेस्वदेशकालइत्यतस्तथोक्तेनविरोधइतिभावः॥ ॥तद
युक्तंसूर्यसिद्धांते॥लंकायामार्द्धरात्रिकाइति॥अत्रयोरतादिरंवुनिवास्यसमदादिव्यवहाररीतिर्मुद्दिश्यलंकापुरस्का
रः॥ तथाचसिद्धपुरास्थितजनोपलक्ष्यायाम्योदक्संस्थलग्नदेशौविशेषाद्यासिनिमध्यरवोग्रहोभवतीति॥ यतोमध्यसा
वनेनैवाहर्गणः कृतोतस्तदपियुक्तमुक्तं॥ ॥एवंस्थूलंतावतीताहर्गणाद्ग्रहानयनमुक्त्वाधुनागुरुतराक्रियया २२
यासमलसविनेयजनमनोविधियाहंकयाचार्धिकदलहर्गणादेवग्रहानयनमभिधित्सुस्तदंगभूतांस्तावत्क्रमे

DR. BHAU DAJI

व्यहतो ज्ञायतेऽतस्तेषां शोध्यत्वेनशुद्धिरित्युच्यतेतस्याः प्रत्यब्दिकोभोगएवगुणकः यतस्तेनाब्देषुगुणितेषुक्षेप
युक्तेषुत्रिंशतातदेषुतावद्दर्शेष्टादिकः शुद्धिशोधोज्ञायते ॥ अरूपः पुनरब्दारंभसंभूतोवारएव ॥ तत्रैकवर्षसाधने
षुसप्तविंशत्यूनेषुसावयवंयदवशेषंतास्मिन्वारेतावतीषुघटीषुमध्यमोरव्यब्दात् द्वितीयवर्षपुनस्तेनाद्विगुणेनावशे
षेण ॥ एवंयथोत्तरमुपचयात् ॥ अतोऽस्याधिवर्षेनियतमवशेष
स्तावानवशेषरूपोब्दांतेऽपस्यभोगोभवति ॥ एवंशुद्धेरप्ययमे
तंगुणकगुणनामात्रेणभ्रमसिद्धिःभयतः प्रागुत्पन्नभोगरूपस्यां
दिशणेयावान्यस्यप्राक्तनोभोगस्तमेवप्रत्येकक्षेप्यत्वेनक्षेपंकृत्य
क्षेपावरेरसकृताकमहीधरारव्यानंदानवेषुदहनाद्धियुगानिचंद्रे ॥ रूपंत्रयोयुगगुणाक्षितिजोग्निवेदाब्धेचतेर्ण
वरसतत्पुरंदरश्च ॥ ६२ ॥ जीवेयमेऽब्ध्यसूर्यमिताः खितोद्रेपूर्णेंदवोयुगमिताः सदलाक्षराभाः ॥ मंदेयमोनव
खद्वोद्धियमामुनिक्षताउद्वेनगाद्रिशरभूमयुरुदराश्च ॥ ६३ ॥ एतेवरंहरामितानवरामसंख्यारामेशवोथशराद्रिश्च
नयेत्स्मृतिघ्न ॥ रामेषवः खमितिवारमुखोथशुद्धौतिथ्यादिकोयमनवाब्धियुगघ्नयोग्यं ॥ ६४ ॥ ॥ अत्राप्यंक

एतेनगताब्दागुणिताऽपरितः सप्तासिसप्तका ब्दिकोभोगइत्युपपन्नं ॥ ॥ अथनक्षत्रा
नयनस्यासंगृहीतत्वात्तदर्थाभ्यां करणा
र्यिलावसततिलक्षत्रयेणसंगृह्णन्नाह ॥ ॥
गतनंदाः तेचशुद्धिश्चतैर्हीनाइति ॥ अयमर्थः ॥ उक्तविधिनानीतमानरविवर्षार्धकालिकान् ॥ ग्रहध्रुवकानक्षारंभ
कालिकोचशुद्ध्यल्पोप्रथममासानंतरंअहर्गणानयनायचैत्रादिकानेवगतमासान्विगण्यत्रिंशतासंगुण्यव
र्तमानमासांतर्गतांस्तिथींस्तत्रसंयोज्यतोमासषष्ट्येनैकोऽहोरात्रिरितिगणनयायावंतएकद्वित्रिमितास्तावंतोया
वद्वर्षारंभकालिकशुद्धिस्तामनुसंख्यांचनक्षत्रतिथिग्रहशुद्धीरुत्पादयेदिति ॥ भूयः संस्कारांतरमाह ॥ ॥ भूयः ॥ ॥

स्थायनमेवसंख्या ॥ उपपत्तिरधिकरणात्प्रागुत्पन्नस्तत्रभोगोमध्यमोनंतरोत्पन्नेभोगेसंयोज्यतइतिन्यायेन ॥ ॥ ननु
तर्हिकरणादेवाणितेनग्रहभोगः साधितोधिनोपनिबद्धक्षेपसमोकथंभवतिकिंतून्यूनएवेतिकथमेतदुक्तमितिचेन्न ॥
लघुपरमार्हगणस्यन्यूनतोपगमायसौरवर्षमध्यकालिकानेवध्रुवानाधातुंस्वस्वगुणार्धंसोदयिकग्रहानयनाय
चस्यमध्यमुक्तंचतथोक्तस्यचाधिकस्याहितत्वेनाधिकत्वस्ययुक्तत्वात् ॥ एवमुपकरणमूतानांध्रुवाणांसाध्य
नमाधिधायाधुनाप्रधानभूतंलघुहर्गेमाधातुंवसंततिलकामेकांप्रयुंक्ते ॥ ॥ चैत्रादिपानतिथयोविगतर्तु
शुद्धिहीनाः समधिपक्षरहिताद्रिनोद्धयः ॥ वारेंदुपारविसमार्कगुणंतेरालंकृत्योदितोद्यहरवेरवसाधनार्थं ॥
५५ ॥ ॥ चैत्रादेरिष्टदिनावधिकास्तिथीः कृत्वाविगतर्तुशुद्धिहीनाः कार्याइतियोजना ॥ विगताश्चेतिऋतवश्चवि
गतर्तवः तेचशुद्धिश्चतैर्हीनाइति ॥ अयमर्थः ॥ उक्तविधिनानीतमानरविवर्षार्धकालिकान् ॥ ग्रहध्रुवकानक्षारंभ
कालिकोचशुद्ध्यल्पोप्रथममासानंतरंअहर्गणानयनायचैत्रादिकानेवगतमासान्विगण्यत्रिंशतासंगुण्यव
र्तमानमासांतर्गतांस्तिथींस्तत्रसंयोज्यतोमासषष्ट्येनैकोऽहोरात्रिरितिगणनयायावंतएकद्वित्रिमितास्तावंतोया
वद्वर्षारंभकालिकशुद्धिस्तामनुसंख्यांचनक्षत्रतिथिग्रहशुद्धीरुत्पादयेदिति ॥ भूयः संस्कारांतरमाह ॥ ॥ भूयः ॥ ॥

समाधिपद्यतीति॥ समाधिपद्याद्यतेर्योघटिकादिरवयवस्तेनापिरहिता: सहिसावनोदिनोद्यस्यादिति॥ ॥अ
त्रैवार्कमाह॥ ॥अब्दपादिति॥ सप्ततद्दहर्गणेशेषमब्दपतिप्राप्तिकोवर्त्तमानोवारोविज्ञेयइति॥एवंजानस्या
हर्गणस्यध्रुवकानुगणनापदनायथायथाव्यवहारिकत्वंस्यात्तथाकंचिद्विशेषमाह॥ ॥समार्धगणांतरालानि
ति॥ समार्धचगजाभ्रयोरंतरालंविश्लेषस्तावन्मितएवात्रग्रहसाधनोपयोगीदिनोच्चः कल्पइति॥समार्धसौराब्द
सावनदिनानाम १८३ ६७ ऊनोपपत्तिः॥ ३६० ०
ईतिशेषः॥अस्यानीतस्याहर्गणस्यांतरेकृतेवर्षेग्रहसाधनार्होहर्गणः कल्पइतिभावः॥
एकोदिक्काहर्गणपक्षाभ्रयणेतावद्व्दारंशादेवाहर्गणोवंगतेयुक्तस्तत्रत्रैराशादेरवतिथिर्व्रज
कृतपाणिसौरवांगांतरभूतान्यधिश्रोषादिनानिविशोधितानितोवांतादप्रतएवाहर्गणः
सतोभवेदितिः॥यानिपुनरृतुमितानिदिनान्यूनीकृतानितान्यवमादिनानिसावनीकरणायतोऋतुदिनैरेवैकै
कमवदिनंपततिततोब्दादिरवाधिपद्यतीतिरुद्यादूर्ध्वमेवोपजायतइतितात्रापिविशोध्यादित्यकर्मएवंकृतेसत्य
वारेदेवकृतःसावनोदिनोद्यःस्यादित्युपपन्नं॥ऊनत्रयतोब्दादेरेवाहर्गणः कृतइतिसावद्यपतिदिनएवेतिन
तोवारक्रमोपियुक्तः ततोवर्षाद्यहर्गणांतरालमहर्गणः कल्पइतियदुक्तंतद्वर्षादिनतुल्यमेवाहर्गणस्य

तथार्थमुपकल्पइतिर्वैचित्र्योपदर्शनायग्रहसाधनफलस्यैतदनुसंधानेनैवधनर्णतांप्रकल्प्यसमाद्गणांतरा
तरूपाण्येवदिनान्यनुपातयोग्यानीतिसंक्षेपतावानेहर्गणइत्युपपन्नं॥ ॥एवंप्रथमोक्तेहर्गणेसिद्धेग्रहा
नयनंविवक्षुः फलसंस्कारोपजीव्यसूतत्वेनप्रथममार्कित्यंग्रहर्क्षेणसाधयन्नाह॥ ॥युगोद्यः स्वगतन
वद्भूवेनहीनोरवंगानिजनगणागतरविकाद्याः॥ वेदाग्नियुक्चयदिनैरविकोनितास्तेवेदानंफलमिनगोनयोऋणं
स्वं॥६५॥ ॥युगंप्रकल्प्योद्यः समुदायोयुगगणइत्यावत्॥ स्वस्यगतनवद्भूवेः षष्ट्यग्रैर्नहीनस्तेचरवे
र्भुक्ताः भागात्मकोरविः स्यादित्यर्थः॥अत्रदिनगणोपिसावयवैरेवेतिंस्थकुर्व्वादिशब्दफलमंशात्मकंयथा
स्थानंविशोध्योद्यसंभूतमारविरित्यर्थः॥अत्रापितन्नामादिः प्राग्वल्लक्षणयागोगएवलाभेतन्निष्पेयं॥ततः
कार्य्यंतमाह॥निजगणागतेति॥निजस्ययोयंनगणागतः सहमांशकेनुत्यादिरविसिद्धिस्तास्थानेसंयुक्तइति॥
तथापिकिंचित्संतरत्वमुपलब्धंतत्परिहारायाह॥ वेदाग्नेति॥ तेरवेर्भुक्ताध्रुवचयचतुर्थभागतुल्याभिरविसंज्ञा
कृतिनोस्तथाकृतेमध्योरविर्भवेदिति॥अत्रोपपत्तेरहर्गणस्यलघुत्वकल्पनिष्प्रयोजनत्वग्रहसाधनेकृतं॥तथा
था॥आर्कस्यमध्यमागतिः यादिकल्पसावनतुल्येनाहर्गणेनकल्पभगणतुल्योभगतादेकीभावेनकिमिति

कलमेकदैवसिकार्कस्यमध्यमागतिः ० ० ५९ ८ २० सत्त्वेनप्रत्यहमयमेकोभागांशुनक्षी दिनैकोभागः संपूर्णः किंत्वेकलिप्ता कार्यइत्यनउक्तस्वागतषड्वेनहीन तुल्यापरिविलिप्तिकाभि रित्यधिकमपित्यूनकृतमितिसंप्रधार्यअतोविलिप्तास्त्येकस्याः कलायाः सप्त मात्राः किंतुसार्धसप्तमात्राः २० इतिपुनरधिकरवौपतितंअतोष्टाभिः षष्टांशनेहतेविलिप्ताचतुष्टयमवाप्यतेतावत्ययुक्तमंतरंग्रहतेषिकंपतितमितिदुपसंहारायाहर्गणस्यचतुर्थभागतुल्याविलिप्ताः विलिप्तास्थानेउनीकार्याइतिप्राक्वेदासघ्नचयाविलिप्तिकानिताइत्यर्थः॥ तद्यथा॥ ग्रहतेहर्गणः ० अयंस्वषष्टांशोन ० ततोनिजनगणागतुल्याभि ० ५९ ८ २० अतोयथाक्रियायांन्यूनेधि ० ५९ ८ २० त्रे॥ यथानीतस्यवक्ष्यमाण एवमन्येषामप्यनेनैवानुपातेन॥ ततश्चैकस्मिन्दिनेशुक्रेरेकभागा तिमतःप्रथममहर्गणतुल्यभागाः कथिताः ततोवक्रगत्येकस्मिन् क्रांतःतथाचैकालिप्तिकांशस्यकिलषष्ट्यंशा एवगतःषष्ठ्यंशउनी यते॥ ततोवक्रतोविचार्यमाणेनैकापिलिप्तिकातत्रोनाकिंतुन्यूनैवा ५८ तिसप्तमात्राः किंतुसार्धसप्तमात्राः २० इतिपुनरधिकरवौपतितंअतोष्टाभिः षष्टांशनेहतेविलिप्ताचतुष्टयमवाप्यतेतावत्ययुक्तमंतरंग्रहतेषिकंपतितमितिदुपसंहारायाहर्गणस्यचतुर्थभागतुल्याविलिप्ताः विलिप्तास्थानेउनीकार्याइतिप्राक्वेदासघ्नचयाविलिप्तिकानिताइत्यर्थः॥ तद्यथा॥ ग्रहतेहर्गणः ० अयंस्वषष्टांशोन ० ततोनिजनगणागतुल्याभि ० ५९ ८ २० तत्तोवेदासघ्नचयः २५ फलेनविलिप्तास्थानउनीकृतोजातोमध्यमोर्कः कलामपन्ने॥ तथातथोपसंहारःकृतइतियुक्तमेवानयनमित्यपप नंचफलानांधनर्णतानिर्णयमाह॥ खेदनामिति॥ ग्रहाणांफला

निसर्वाण्यधिरवावुत्तरगोलस्थितेऋणमन्यथाधनमित्यर्थः॥ उक्तंवक्ष्यमाणंचघृणासाधितंग्रहयोगरूपंयत्कृतं तत्स्वस्वध्रुवकेषुप्रागुदाहृतेषुमेषादिराशिषट्कांतर्गतंधनमृणमन्यथाधनमितिस्वशोधनेनसंस्कृतोध्रुवएव॥ पार मार्थिकोमध्यग्रहस्यादितिभावः॥ अस्योपपत्तिः॥ यतोध्रुवाः किलवर्षमध्यकालिकाएवंअहर्गणसंस्कृताश्च प्रागर्धा नुप्रतिलोममानीतोवर्षार्धपर्यंतंध्रुवः पुरतःअहर्गणस्यविलोमत्वात्ग्रहयोगोपिविपर्यस्तएवेतिवर्षार्धंवर्धि कृतस्यध्रुवकेशोधनीयत्वमेवन्यायमितिमत्वावर्षार्धिपर्यंतंमेषादिराशिषट्कएवादित्यस्यचक्रोत्तरस्येवदक्षि णगोलानियमादुत्तरगोलस्थितेरविवत्पुनश्चक्रमुक्तंततोवर्षोत्तरार्धेध्रुवस्यहृद्दास्थितत्वेनाहर्गणस्यचानुलो मत्वात्॥ तुलादेरेवदक्षिणगोलतोपगमेनतदानादित्यस्यवक्रित्वेनफलस्यक्षेप्यत्वेनधनकर्मत्वमेवन्यायमि तिसदुक्तंरेवतांफलंतोलयोऋणंस्वमितिं॥ एवमन्येषामपिग्रहाणांएकदैवसिकंगतिंउपपादयसवर्णनादिगि र्गुणहारोकल्पयित्वायथायथांतरंस्योपसंहारोभवतितथासंस्कारादिकमुपदिश्यकर्मप्रदर्शनमितिमंतव्यं॥ मयानुअत्रसर्वत्रक्रियासामान्यादादित्यसाध्योपपत्तिप्रदर्शनमात्रेणैवसंसूचितमितिविस्तरभीरुतादुक्ता नतयाचेतदुपेक्षितएवसवर्णनोपपत्तेर्गुणनादीनांदुरूपत्वेनैवंविधयज्ञानुन्मुख्यंकिंपुनः प्रज्ञाविज्ञानसम

स्तत्रास्थैरित्यतद्विषयउपरम्यते॥ आचार्येणापि लघुर्गणादिकं प्रकारमाश्रित्य बालानामपि स्वविनेयानां ग्रहकर
णादिविषयेसहसाकृत्यादकंसाधनप्रकारमनुसरत्येवेदंसर्वकर्मचमत्कारिस्फुटंचोपदर्शितमितिशिष्येण॥ कथमन्यथासि
द्धांतेषितथाप्रकारादरस्तेषांतत्रेषामध्यमागनयः॥ र चं मं बु गु शु भृ उ पा
दिनगणोगुणचेद्गुणः पृथग्भागुण्तेनगवाप्तिनगो ० २५ ० ५ ० ० ० ०
पुर्लवपूर्वकोदिनगणादिलवोनविलिप्तकः॥ ६७॥ ५१ २० २१ ५ ० २५ २ ५ २०
चेद्गुणः गुणाश्चंद्रभक्तेतित्रयोदशातैर्गुणितोलवपूर्व २० ३४ २५ २३ २५ ० ५४ २४ ५४ २५
जनाद्यगुणाद्विधासंस्थाप्योपर्यत्रत्रयोदशाप्तिर्गुणये २० ८ ५ २८ ८ ५४ २४ ५४ २५
त्पुनरपरत्रदशाप्तिर्गुणायित्वोत्तरत्रैवसप्तत्रिंशादधिकैः सप्तशतैः ७३७॥ शतैर्विशाढ्यशागा दिनाफलेनपूर्वेरा
शीः संयुतः सकिलतत्रवारिकभंत्रयोदशवतीत्यर्थः॥ पुनः सांतरतापरिहारायफलांतरेणसंस्कारणमाह॥ ॥दिनग
णाहतलवेनेति॥ दिनगणस्यअहर्संख्याकैरष्टशतैर्लवोनागफलेनचुनाविलिप्तिकाविकलायस्यसतथा॥ फलगण
स्यासिद्धिरित्यर्थः॥ अत्रोपपत्तिः॥ प्राग्वत्चंद्रस्यैकस्मिन्दिनेभोग
स्त्रयोदशांशागाः शेषावयवा २० यमधिकृत्याथा

थायंयैर्गुणैर्दशाप्तगुण्यते २० त्रयोदशांशागतुल्यो विदुषः संभवेत्तदस्यसवर्णनामितिविचिंत्यतएतावद्भिर्दिनै७३७
रिदमंतरं २० दशगुणितत्रयोदशांशागतुल्यंअतः सवर्णनाकोंशागहारः क्रियातुल्यैर्गुणकस्यखंडद्वयंएकं २०अपरं
२० तत्तत्र २५ प्रथममेवत्रयोदशांशैर्गुणितः सएवपथकूस्थापितः पुनश्चदशांशैर्गुणतीयमित्यादिसुगममेव॥ ॥
अथभौमंसाधयन्नेतदेवतत्रमेकप्रयुंक्ते॥ ॥निजनिशाकरनेत्रलवाचितंदिनगणस्यदलंलवपूर्वकः॥ विरहणद्युगणे
नचसंयुतंविकलिकासुभवेत्क्षितिनंदनः॥ ६८॥ ॥दिनगणस्यदलंनिजनिशाकरनेत्रलवोचितंक्षितिनंदनस्यादि
त्यन्वयः॥ दिनगणस्यार्धगणस्यदलमर्धंतन्निजस्यात्मनोनिशाकरश्चनेत्रेचेत्येकविंशतिः तान्मितेनलवेनभागेना
न्वितंयुक्तंसत्तिथागतात्मकोभौमः स्यादितिसांतरतापरिहारायाहविचरणद्युगणेतिचतुर्थांशेनोनिकृतोयोद्युगण
स्तन्मितैर्विलिप्तिकाभिर्विलिप्तिकासुसंयुतइत्यर्थः॥ अत्रापि भौमस्तावदेकस्मिन्दिने ½ भागार्धमेव
किंचिदधिकंभुनक्तीतिमत्वा यथासांतरतोपसंहारस्तथाकर्मप्रदर्शितमितिवासनाव्यक्तैव॥ ॥ अथनेत्रैरवनेनज्ञच
रंसाधयन्नाह॥ ॥खगणसंगुणितार्णवसंमितिर्बुधचलोज्झलवाः ३ खशराहताः॥ खगणतोनवलब्धकलानि
तावित्कलिकासुगणेनविशोधिताः॥ ६९॥ ॥खगणसंगुणितार्णवसंमितिः बुधचलोज्झलवाष्टवतीत्यन्वयः॥

चतुर्भिर्गुणितोऽहर्गणः तदैवबुधचलभागोऽित्यर्थः॥ ततः पंचाशता गुणितात्स्वगणात्तनवभिर्विभक्तात्तल्लिप्तादिकं
लंतल्लिप्ताफलंतल्लिप्तास्थाने संयोजयेदिति॥ तथापिपुनः सांतरत्वंपरिहरन्नाहविकलास्त्रिनिविकलिकास्त्रैराशिकेन गुणनु
त्यात्विलिप्ताः शोध्याइत्यर्थः॥ अत्रापियतोबुधचलस्यगतिः ४ / ५ / ३६ सावयवभागचतुष्टयंअतश्चतुर्गुणात्स्वगणात्तुल्यो
एवतस्यभागाः ततोवयवोनवभिः सवर्णनेनपंचाशताफला / मितोजातोतः पंचाशतास्वगणस्यगुणनेनवभिश्च
भागइत्यादिव्यक्तं॥ ॥अथगुरुमपितेनैवयत्नेनसाधयन्नाह॥ ॥दिनगणोऽर्कगुणोनखाब्धिभक्तोदिनगणात्यति
तोविकलात्मकऋणं॥ शरसमारुतवासरसंचयोन्मितकलादिपुरंदरपूजिते॥ ॥५ स्त्रि५ ७०॥ ॥दिनगणोहर्गणास्त्रिभि
र्गुणनीयोविंशत्यब्धिभाजितः फलमहर्गणाद्विशोध्यावशेषंविलिप्ताः शरसंचयोदिनगणस्तत्परिमिताश्चताः फलाश्चत
दूनोयः पुरंदरपूजितेगुरुस्तत्रत्रिभिर्गुणितात्तदहर्गणाद्विंशत्याभक्तान्फलमहर्गणाद्विशोध्यशेषान्मितावलिप्तादि
कंऋणंविदध्यादित्यर्थः॥ सचकलात्मकोगुरुर्यथोत्तरंउपर्युपरिस्थापितः सवीवयवोभागाथेगुरुर्भवेदित्यर्थः॥ श्री
अस्योपपत्तिः॥ गुरोर्विलेप्तामध्यमागतिः ५ / ८ लिप्तापंचकायत्नाजातः पंचाभिर्गुणितोऽहर्गणोलिप्तादिर्गुरुभवे २९
शेषावयवसंभूतमंतरमधिकंअतः प्राग्लिप्तास्थानेयदंतरं तत

दिंदुरात्रिभिर्दिनैर्विलिप्तात्रयरूपमवतीतितथास्वर्ण्याहर्गणादूनीकृत्यशेषविलिप्ताभिरधिकोगुरुर्जातस्तावति
ष्यूनीकृतइत्युपपद्यते॥ ॥अथतेनैवयत्नेनासितेचलार्कफलेतेयोरायनमाह॥ ॥रसितचलेर्कफलंस्वदलान्वि
तंगतगतांशगणाष्टलवेनयुक्॥ खगुणलब्धगणोलवपूर्वकोगणखभूपलवाथफलः स्फुटः॥ ७१॥ ॥अस्य
सूत्रस्यवासनानीतंफलंतेनास्मिंस्तेनान्वितंतत्तोगतः॥ स्फुटांशोयस्मादेवंभूतयोर्गुणकारस्याष्टांशोनपुनर
न्वितंसितचलेफलंस्यादिति॥ ॥अत्रापिउपपत्तिः॥ ॥रविगतिरल्पाल्किंचिदल्पाधिकासतीसितचलस्यकिल
सूक्ष्मदिनेतदुपपन्नंफलमप्यल्पंसितचलस्यफलंभवितुमर्हतीति॥ शीघावयवभूतांतरोपसंहारायशीघक्रिया
वेलायांइतिव्यक्तं॥ ॥अथोक्तमर्थंस्पष्टयन्नाह॥ ॥खगुणलब्धगणइत्यादिना॥ खगणोहर्गणाद्विशुद्धा
द्विशुद्धोलवपूर्वकोभवेत्॥ संस्कारांतरमाह॥ खभूपेति॥ खंचभूपाश्च १५० गणस्यखभूपैर्लवैर्नेन
आढ्याः फलायस्यसतथा॥ षष्ट्युत्तरेणशतेनहृतेनहृतगणविभाज्यफलिकादिनाफलेनानीतः स्फुटोनियुक्तः कार्य
इत्यर्थः॥ ॥अस्योपपत्तिः॥ शनैः प्रत्यहमेषाकिलमध्यमागतिः ३ / २४ तथाचदिनानांत्रिंशताचैकोभागः
पतितीत्यहर्गणात्त्रिंशताभक्तः फलभागात्मा॥ स्फुटः॥ ततोवयव / संभूतांतरोपसंहारायशीघक्रिये

तिव्यक्तं ॥ ॥अथ्युनाविधूच्चसाधनमेतेनभुजंगप्रयातेनाह॥ ॥दृग्ज्ञानोदितोच्चोनवार्कं विधूच्चं स्वकीयत्रिभागोनि-
ताहर्गणेन॥कुवेदाग्न्ययुक्तेनयुक्तंकलासक्रमायातमर्कस्यपातंप्रवक्ष्ये॥७२॥ ॥दिनोद्यदृग्ज्ञानिर्भक्तःफलंतद्गतादिकं
विधूच्चंस्यादित्यन्वयः॥फलांतरेणसंस्कृतिमाह॥स्वत्रिभागेति॥स्वस्यत्रिभागोहर्गणस्यत्र्यंशइत्यर्थः॥तेनोनितो
योहर्गणःपुनःस्वस्येदृक्चलारिंशदूनेनयुक्तस्तथाभूतेनतेनतुल्यांशिः किलागतानीतमुच्चकलासंयुक्तंनिरं
तरंस्यादित्यर्थः॥ ॥अस्योपपत्तिः॥ ॥विधूच्चस्याहिप्रत्यहंसमामध्यमागतिः ६ / ५४ तथाचदृग्ज्ञानिर्दिनैरेकैको
भागःपूर्यतइतिसमत्वादृग्ज्ञानोदितोच्चहृत्यर्कं॥शेषावयवसंभूतांतरोपसंहारा यदशेषक्रियावतारहतेस्व
गमं॥ ॥अथचंद्रस्यपातशोधकत्वेनसाधयन्नाह॥ ॥दिग्गुणिद्व्यक्षिहतोदिनसंघः स्वाक्षतिभागवि
युक्तकलिकाघ्नं॥चंद्रतमःस्वफलेनयुतोनाःस्वर्भवकाउदयेचचराःस्युः॥७३॥ ॥दृग्ज्ञानिर्गुणितमहर्गणंत्रि
स्तिर्विभाज्यंफलकलिकादिचंद्रतमस्यादित्यन्वयः॥किंभूतंस्वाक्षतिभागवियुक्तस्वाक्षतिभागाहाविंशत्यंशाः
तेनहीनमित्यर्थः॥तथाहृतेनकलामयइंदुपातोशवेदितिभागवः॥अस्योपपत्तिः॥पातस्यकिलेषामध्यमागतिः
२॥ तथाचैषात्रिभिःसावर्णिनादृक्कलासंज्ञाजातेनिमत्तात्रिभिर्दिनैरेनावान्भोगइतिसंप्रधार्यदिनगणो

DR BHAU DAJI LIBRARY

दृग्ज्ञानिर्गुणनीयःत्रिभिर्विभाज्यइत्यर्कं॥तथाविसांतरमेवानयनंयतोनहित्रिभिर्दिनैःकलादृग्गतिभोगः वि
तु ६ / ५४ ॥तथाचैषत्रिभिः सावर्णिन २॥एतावधिकमपिपतितमितितदपसंहर्तुंफलस्यहाविंशत्यंशाउनीकृतःयतो
मापिहीनभोगस्यास्य ६ / ५४ हाविंशत्यंशाएव॥तत्तस्यविशोधनमधिकभूतस्योपसंहारार्थमितिसर्वमुपपन्नं॥
ननुकिमेतान्यानीतानिफलान्येवग्रहाउतान्यथेत्याशंक्योत्तरमाह॥स्वफलेनयुक्तोनाइति॥फलेनेत्यत्रैकवच
नंजातीयंस्वस्वफलेनानेतरानीतेनतेनस्यतस्यध्रुवःस्वेदानींफलमितिभोक्तव्योऋणंस्वमित्याद्युक्तेनयथाव
त्संस्कृतोवक्ष्यमाणयातत्तद्ग्रहभागःस्यादित्यर्थः॥अतएवध्रुवकारकक्षेपविशेषाएवेतिप्रागुक्तंपतनर्णतोपत्ति
रापिरत्रानयनेप्रागेवास्माभिरुपदर्शितेति॥चंद्रोच्चयातयोर्विशेषः करणंकुंडीरवेप्रोक्तः॥ह्रासापातकला
स्त्याज्याःसदलंचग्रातंग्रातं॥चंद्रोच्चयातयोरेवदृक्साम्यंसंप्रदायिकमित्यपिविलोकनीयं॥यतोमुनीनामापि
प्रायोतिनिगूढः॥ ॥एवंप्रत्येकंग्रहणंयथोचितंसाधनमुक्त्वाधुनैकस्माज्ज्ञातग्रहादेवाज्ञातग्रहानार्थमेकामार्या
मार्ह॥ ॥अज्ञातग्रहयुत्यागुणितेविज्ञातग्रहमितिनिर्गुणिता॥ज्ञातग्रहयुक्तिहृदाप्तलब्धमविज्ञातखेटः स्यात्॥
७४॥ ॥विज्ञातग्रहमितिरज्ञातग्रहयुत्यागुणितासतीविज्ञातग्रहयुत्याविहृताफलमविज्ञातग्रहस्यादित्यन्वेयः॥

अज्ञातश्चासौग्रहश्चेत्यज्ञातग्रहः। तस्य विज्ञातस्य ग्रहस्यामितिः परिमितिः स्वरूपमितिर्यावत्तावत्तया गुणयेद्विज्ञातग्रहभुक्त्या विभजेत्फलमविज्ञातग्रहः स्यादित्यर्थः॥ योयदाग्रहः सिसाधयिषाविषयीभूतः तस्यायमध्यमागतिः तयाज्ञातमिष्टग्रहं गुणयेत्॥ प्रमाणादृतस्येवाविज्ञाविज्ञातग्रहस्य लब्धिं विभजेत्॥ अवाप्तफलतुल्यैवतदाजिज्ञासितोग्रहो भवतीतिगणकः॥ अत्रोपपत्तिरनुपपन्नैव॥ विज्ञातस्यग्रहभुक्तिर्नुल्यैकदेवासिद्धप्रतिपादिनीयेनेष्टविज्ञातग्रहतुल्यफलंनदविज्ञातग्रहभुक्त्यापिप्रायेणकिमितिं॥ यदितिफलमविज्ञातग्रहइत्युपपन्नं॥ ॥अथाहर्गणेयथासंभवमधिमासकृतंविशेषप्रतिपादयन्नुत्तरार्धमुत्तरंप्रयुङ्क्ते॥ ॥आलब्धोधिमासःस्यादलभ्यतेचेन्नदाक्षयत्रिरहाहिशुद्धिर्विशङ्का॥ ततःसाध्यतीयोद्भमध्येदिनौघःप्रयाताधिमासाःस्युदारूपहीनाः॥७५॥ ॥अस्येदमुक्तंभवत्यस्मिन्नापातेतोप्यधिमासोहर्गणानयनेचेदुपलभ्यतेतदाधिमासाःस्युरितरथाचलब्धानिधिमासान्निरेकानुक्तासाध्यंदत्यथास्पष्टमानेपिपतितोपिचेदहर्गणानयनेनोपलभ्यतेतदासकेरेवशुद्धिः॥ शुद्धिपुनरस्थिरातोविज्ञोध्यशेषतुल्यंशुध्यंशकल्प्यहर्गणः साध्यः॥ यतोहर्गणेमध्यमानेनैवाधिमासोपस्थितिःफलसाधनेपुनःस्फुटस्येपोपयुक्तेत्वतस्तत्समीचीनमुक्तं॥ ॥अथप्रसंगसंगत्यास्यमध्यधिमासमुपपादयिषुः॥ तावन्मासिलुचेत्वेहेतुपरिकल्पनामासस्वरूपमनुष्ठुपद्वयेनोपदर्शयन्नाह॥ ॥सूर्यसंक्रमसंपर्का

ब्दमासस्यशुद्धता। तद्वियोगाद्विशुद्धत्वमधिकत्वंनजायते॥७६॥ मेषार्कसंक्रमोयत्रचांद्रमासेनजायते॥ समासोमधुसंज्ञकःस्यान्माधवाघाढ्यादिभिः॥७७॥ स्पष्टार्थं॥ अथाधिकत्वंकेनप्रकारेणकियत्सुसौरेष्वधिमासःपततीत्यवस्थापयन्विक्रीडितेनाधिमासोपपादकमनुपातमेवावतारयति॥ चंद्रैर्हतद्दामासकैश्चतिथीशैः श्रीकंठसंख्यैस्तथानाडीरिंद्रिरामैर्मासयुक्तैस्तयासौरवर्षंयतः॥ एकस्मिन्नरविवत्सरेयदधिकंस्याद्दद्यथानतोमासैः सार्धरदोन्मितैरधिकमासश्चितिथिर्मध्यमः॥७८॥ ॥मयैतद्दिव्यरत्नरत्नप्रायेवयुगाधिमासयसमर्थनावसरेसर्वप्रतिपादिनचरमेतिगतार्थत्वादनुद्योगः॥ ॥अथप्रकारांतरेणापिअधिमासकालस्वरूपोपदर्शनायप्रत्येकंमनुपातार्थंसौरचांद्रमासयोःसावनमानानेतुपुनस्तद्दिव्यरत्नमेकमसिसंधत्ते॥ ॥एकेचेदवमदिनंदिनमणोःस्यान्मध्यगत्यातदाराशेःकिंरविमासकोथहिमकुमासरक्तगत्यंतरे॥ एकंस्याद्भविसावनेयदिनदाचक्रेकिमेकंविधोर्मासादाधिकोरवेरधिकमासस्तत्सार्धदोन्मितैः॥७९॥ ॥अस्यायमर्थः॥ दिनमणेरार्कीत्यस्यमध्यगत्या५९चेदेकमवमदिनंभवतिदिनभगणेतदेकरात्रिलिप्तानि१८०० तासिः किमितिलभ्यंतेसौरेमासिसावनदिनानि३० ननश्च। इमेसासावनायनेमनुपातंनरेणयादिव्यचंद्रलिप्तासिरेकंदिनंनंचकृत्वात्रिरंतरलिप्ताः२१६००। किमितिलभ्यंतेचांद्रमासस्यकदिनानि२९ ततस्मा द्रविमासाधिकएवेति३२ अथस्मृतिसंहिताहृद्यविप्रतिषेधंन मंडलानिप्रायमधिमासविचयेनु रांसंनेत्र

येऽवज्ञया स्फुटमासस्य लक्षणमाह ॥ ॥ दर्शान्ततो मंडलनाडिकांतमासः ससूर्येंदुसमागमांतः ॥ नेंदनरेणेंद्रियसंक्रमस्यान्
दासश्च दृक्खेधिकोन्यथासौ ॥ ७८० ॥ ॥ अस्येदंतात्पर्यं लोके द्वयोरुक्तेश्चप्रसिद्धो दर्शांतिको मासः ॥ प्रथममानापेक्षयोद्वितीयो मा
नोपायतात्कालेनअतएवप्रतिपदादेर्मासांतएवंतमेवमासंगणयंति ॥ तथाच्यग्रंथाधिकारस्यनिर्णयेस्मानिसंहितादिग्रंथोक्तसंज्ञां
तिकएवमासउपात्तः ॥ सयथा ॥ दर्शांतकालेकिलमंडलेंद्वयेरेवप्रागपरांतेनभुज्यतेपरंतेदेवमंडलयोरपि ॥ तथाचरवींदुर्भुज्यतेः
सयुतिर्यावदन्यविधोर्मासइत्यादिवाक्यजातेनमासस्यरवींदुसंयोगकालावधिकत्वमेवप्रतिपाद्यते ॥ तथाचविधुबिंबापरभाग
स्यसदार्कबिंबप्राङ्मिदेशान्निःसरणंतदेवतयोस्संयोगइतितवधिकएवमासइतिवक्तुंयुक्तंसचविधोरर्कमंडलभोगकाले
नाधिकएवसंपद्यते ॥ तत्रार्कमंडलभोगकालस्तावान्मध्यमएवानुपातेनसाध्यते ॥ यदिष्यर्कचंद्रगतिसमानाभिरंतरलिप्ताभि
७३० एतावतीषष्टीकृतदर्कमंडलपर्यंतागतिरासिः ३२ कियतिप्रलवे ३ अयंकिलार्कमंडलादृविवस्यनिःसरणकालोमांता
दृश्यधिकस्तस्मादमुमेवाढ्यगुणीकृत्यप्रवेश्य कालत्रयाधि ३३ संगुण्यतदारुन्नतयाधिसंगुण्यतदारुन्नतयोरसना
ज्योर्कमंडलमित्यादिग्रंथेनैवस्वस्वग्रंथेषुप्रतिपादितंतथाचेतदर्थाधिकारांतर्गतएवचेदपरः संक्रमस्तदा श्री
समाप्तिरुच्यतेतदेतन्न सत्यमित्यादिनाग्रंथेनैवतन ॥ तथाचेतत्पर्यवसन्नंप्राक्तनमांतादर्शांतेयग्रंथसंक्रमेणतदनं ३२
यहेतद्वितीयमानान्मंडलभोगकालोप्यधिकादृश्यतएव ॥ यदिद्वितीयः संक्रमस्तदासमासस्यसंक्रांतिकल्पादधिकइ
ति ॥

यत्कलैर्गतंतत्खाभ्रवाणाष्टभूमिः १८००००० तक्षंसदवशेषस्यलक्षणमुच्यते ॥ यातेव्येतयोर्मध्येयदल्पंतच्छमा इसी
सिरेकंरामंचंद्रमसंकृतुंद्रवसुंरुद्रंशिवंगुणचिलानवतीरयुतैर्विभाजेत् ॥ यानिफलानितेषुसूर्यसोरक्षंनीजाद्रोतिरवि
शशिनोर्मांसाःस्वस्वफलेनयुताःबुधशुक्रचंद्रेज्याःस्वस्वफलैर्विजितास्तथाकृतेसांशतोपलब्धयोग्यामध्यमाःस्फुटाइति ॥ इदमु
पलक्षणमात्रंकृतंग्रंथेनाकृतेपूर्वतमपिगुरुसांप्रदायागतत्वेनासीदेवतयुनःस्पष्टत्वप्रत्यायनायपुनरुक्तंकृतं ॥

ननुअयंमंडलांतिकोमासः केषांचिदुतसर्वेषांकिंनिबंधनश्चेत्याशंक्येदमुच्यतेनाह॥ ॥इदंमदुक्तंक्षितिगार्ग्यगाणांकुदृष्ट
गानामथसंप्रवक्ष्ये॥यःसाधितादृग्विषयप्रकालःस्फुटोभवेल्लंबनसंस्कृतोत्र॥८१॥यतःस्फुटेदृग्विषयप्रकालेदृक्सूत्रसं
स्थोरविशीतरश्मी॥कुदृष्टगानामितिनिश्चयेनस्यात्तांहितज्ञोलविदेवदंति॥८२॥ ॥स्पष्टार्थमपिकिंविधाख्यायते॥॥
अत्रमंडलांतिकोमासः भूगार्ग्यस्थानमेव॥भूदृष्टस्थानानुसाधितोयोदृग्विषयप्रकालःदर्शांतःसमत्रभूदृष्टस्थानाधि
मासविषयेलंबनविषयसंस्कृतःसनस्फुटोभवति॥अयमर्थः संधिः योगाद्गतोमासः कपालविभागेनलंबनघटीसं
स्कृतःस्फुटोभवतीति॥कस्माद्धेतोः यतःकारणात्स्फुटदृग्विषयप्रकालःकपालविभागेनलंबनघटीसंस्कृतदर्शांतेसूर्यचंद्र
मसोदृक्सूत्रंसंस्थोस्यात्तांतदृष्टिसूत्रेस्यातामित्यर्थः॥केषामित्याशंक्याह॥कुदृष्टगानामिति॥नियमेनभूदृष्टयोरसिनां
ख्यातामितिभावः॥तत्पूर्वेकंगोलविदेवदंतिहियस्मात्तोलविदः॥तोलंसम्यक्प्रकारेणजानंतः योगोलंनविदंतितेइंगो
लबासनाना-- नंजानंतीत्यर्थात्तूचितं॥इदंकिलसंभवदशिष्याप्रायेणग्रहणविषयेकमितिताल्पर्यंपर्यवसानं॥कस्माददं
क्रांतिकोमासोऽधिमासइतिलक्षणं॥तदुक्तंभास्कराचार्यैः॥असंक्रांतिमासोऽधिमासः स्फुटःस्याद्द्विसंक्रांतिमासः
क्षयाख्यःकदाचित्॥क्षयःकार्तिकादित्रयेनान्यतःस्यादित्यादि॥ ॥नन्वत्रद्विसंक्रांतिकःक्षयइतियदुक्तंनदैकास्मि

मासेकथंसंक्रमद्वयमित्यस्माकंविस्मयपदमितिचेन्न॥यदाकिलैकविंशतिकाक्षुद्धिस्तदाकार्त्तिकादित्रयएवार्कमासस्यपरमात्यन्तसंभवेन २९ चांद्रादपि २९ न्यूनतयासंक्रमद्वयस्येकस्मिन्नपिमासेपतनोपपन्नतयाचत्वारिंशतैरेवातिप्रपंचेनसमर्पितत्वात्॥अत ३० एवास्मद्दा ३० चार्य्यस्यैतद्धृदयेनारदद्दाति॥तस्मादधिमासविषयेमंडूकाद्यायएवावश्यकएवेतिस्मातिसंहितानांराणामसिमतं॥ननुतोकृष्णस्यप्रासिद्धिमन्यथाकृत्वाकथमेतन्नेरथकृगतं॥अस्तिबाधकेतथाकृत्यानुपपन्नेरितिचेन्नूसत्यं॥एतदनुपपन्नेरेवोन्यथाआसन्नसंक्रमयोर्मासयोरुभयोरप्यधिकापत्तेः॥तथाहि॥यदाकिलसार्द्धैकोनविंशतेरासन्नाक्षुद्धिस्तदाकार्त्तिकस्याधिकत्वंसंभाव्यते॥तत्राकर्मतेरकृत्यतयामार्गशीर्षपुष्याद्यप्यमासन्नसंक्रमावेवेति॥कतरस्योधिकोवक्तव्यः॥प्रत्येकमपिपरस्परासन्नसंक्रमत्वेनाविनियंतुमशक्यत्वात्॥अतोविनिगमकोमंडूकाद्यपिप्राय एवनापरशंकथमनावश्यकः॥अस्यविनिगमनास्वरूपंचकार्त्तिकादित्रिकस्यैवतस्याधिकत्वसंभवेनानिरुद्धक्षुद्धिसंभवकालएवनान्यथेतियुक्तमुक्तं॥॥एवंसंप्रदायागतेनकर्मणायथावत्साध्यग्रहसाधनमुक्तं॥सांप्रतोपलब्ध्यनुसारेणयेयमाधुनिकेरूपकाल्पितोबीजसंस्कारः तमनुसरत्यथाग्रहणांदृग्गणितैक्यमुपजायतेतथास्वाविष्णीवृत्तद्वयेनप्रतिपादयन्नाह॥ ॥खाभ्ररवाष्टाब्धिसूर्यैस्तुसंस्कृतोरविरुक्तमः॥कुदृष्टगानामयंसम्यक्तेस्तुष्टमतस्यपातेष्ववोरत्यकः॥तद्वत्पावकैःसिद्धसंख्यैर्हतेदग्यमैःखाग्निभिःखांकैर्दाशभिः॥८१॥नंदनिघ्नामुनेनाप्तोगैर्युनाःसूर्यसौरावनिजाःपरेवर्जिताः॥दृक्समंग्रहणानमनेनस्फुटंप्राहदामोदराचार्यएवंबुधः॥८२॥ ३३

ननुअयंमंडूकोतिकोमासःकेषांचिदुतसर्वेषांकिंनिबंधनश्चेत्याकांक्षायेउक्तमुच्यतेनाह॥ ॥इदंमदुक्तंक्षितिगोलगाणां
कुदृष्टगानामथसंप्रवक्ष्ये॥यःसाधितोदर्शविरामकालःस्फुटोरवेर्लंबनसंस्कृतोऽत्र॥८१॥यतःस्फुटेदर्शविरामकाले दृक्सूत्रसंस्थौरविचंद्रतारकौ॥कुदृष्टगानामितिनिश्चयेनस्यात्तोहितज्ञोलविदोवदंति॥८२॥ ॥स्पष्टार्थमपि
किंचिद्व्याख्यायते॥अत्रमंडूकोतिकोमासःभूगोलस्थानमेव॥भूदृष्टस्थानांतुसाधितोयोदर्शविरामकालःदर्शांतः
सजन्यभूदृष्टस्थानांअधिमासविषयेलंबनसंस्कृतःसन्स्फुटोभवति॥अयमत्रसंधिः योगणितागतोमानःकपालविभागेनलंबनघटीसंस्कृतःस्फुटोभवतीति॥कस्माद्धेतोः॥यतःकारणात्स्फुटदर्शविरामकालेकपालविभागेन
लंबनघटीसंस्कृतदर्शांतेसूर्येंदुभसोदृक्सूत्रसंस्थौस्यातां॥दृक्सूत्रेस्यातामित्यर्थः॥केषामित्याशंक्याह॥
कुदृष्टगानामितिं॥नियमेनभूदृष्टस्थानांस्यातामितिभावः॥तत्रभूगोलकेगोलविदोवदंति॥हियस्माद्गोलविदः॥
गोलंसम्यक्प्रकारेणजानंतःयेतेतेनर्षिदंतिनेदंगोलवासिनांत -- नजानंतीत्यर्थात्सूचितं॥इदंफलसंस्कार
दर्शिप्रायेणग्रहणविषयकमितिताप्तर्यंपर्यवसान्॥कस्माद्दसंक्रांतिकोमासोधिमासश्चेतिलक्षणं॥तदुक्तंसूर्यसि
द्धांतार्थैः॥असंक्रांतिमासोधिमासःस्फुटःस्याद्द्विसंक्रांतिमासःक्षयाख्यःकदाचित्॥क्षयःकार्त्तिकादित्रिकेन्यत्रनास्यात्स्यादित्यादि॥ ॥तत्रत्रिसंक्रांतिकःक्षयइतियदुक्तंतदेकस्मिन्मासेकथंसंक्रमद्वयमित्यस्माकंविस्मयप

दमिति चेन्न॥ यदा किलैकविंशतिकाष्ठहिस्तदा कार्त्तिकादित्रय एवार्कमासस्य परमात्यत्वसंभवेन २९॥ चांद्रादपि २९॥
न्यूनतया संक्रमद्वयस्यैकस्मिन्नपि मासि पतनोपपत्तेर्यया स्वासिद्धांतेतेरेवाति ग्रंथेनसमर्पितत्वात्॥ अत एवास-
दाचार्यस्यैतद्विषयेनादरइति॥ तस्मादधिमासविषयेमंडलाग्रप्राप्तआवश्यक एवेतिस्मृतिसंहिताकाराणामाशयः॥
ननुलोकप्रसिद्धिमन्यथाकृत्वाकथमेतन्नेरस्यपतंते॥ असतिबाधकेतथाकल्पनानुपपत्तेरिति चेत्सत्यं॥ एतद-
नुपपत्तेरेवान्यथासन्नसंक्रमयोर्मासयोरूपयोरप्यधिकापत्तेः॥ तथाहि॥ यदाकिलसार्द्धकोनैर्विंशतेरासन्नास्तुहिस्त-
दाकार्त्तिकस्याधिकत्वंसाध्यतेतदार्कगतेरुक्तन्यायमार्गतीर्वपुण्यावश्यमंतासन्नसंक्रमावेवेति॥ कतरस्तेषधिको वक्तव्यः॥ प्रत्येकमपिपरस्परासन्नसंक्रमत्वेनविनिगंतुमशक्यत्वात्॥ अतोविनिगमकोमंडलाग्रप्राप्तएवनापरइतिकथमनादरणीयः॥ अस्यविनिगमनास्वरसंचकार्त्तिकादित्रिकमेवतस्याधिकत्वसंभावनानिरुक्तरुद्धिसंभवकाल एवनान्यथेतियुक्तमुक्तं॥
एवंसंप्रदायागतेनकर्मणायथावन्मध्यग्रहसाधनमुक्त्वासांप्रतोपलब्ध्यनुसारेणयोयमाधुनिकैरुपकल्पितोबीजसंस्कारः॥
तमनुसत्ययाग्रहाणांदृग्गतीनेकमुपजायतेतथात्वाग्रिणीवृत्तद्वयेनप्रतिपादयन्नाह॥ ॥खाभ्रखाभ्राक्षभूमिर्गतेयत्कले श्री
रन्ध्रमेतस्यपौष्ण्यो रत्यकं॥तद्वत्पावकैः सिद्धसंख्यैर्हतंदस्यमेः खाग्निभिः संयुतं कैरदिग्गैः॥ ८१॥ नंदनिघ्नामुनेनाप्तयो
गेर्युताः सूर्यसौराः वनीजाः पेरेवर्जिताः॥ दृक्समत्वंग्रहाणामनेनस्फुटंग्राहदामेदराचार्य एवंबुधः॥ ८२॥ ॥यत्कले ३३

गतंतन्नखाभ्राक्षाभूमिः १८००००तक्षंसदवनीघ्नस्यलक्षणशुद्धस्यचेयातेष्येतयोर्मध्येयदत्यंकंतत्क्रमादमीषांरवेः
रविचंद्रमं२४ बु२२ दे२० शु९० रा० गुणयित्वानवाप्तरघुतेर्विभाजेत्॥ यानिपलानितेषुसूर्यसौरावनीजाप्तिरविग्रहनिशोमाः
स्वस्वफलेनयुताः बुधशुक्रचंद्रेज्याः स्वस्वफलैर्विर्जितास्तथाकृतेरसांप्रतोपलंभयोग्यामध्यमाः स्युरिति॥ इदमुपलंभसाक्षि-
कंपारंपर्येणग्रंथाद्वाहीभूतमपिगुरुसंप्रदायागतत्वेनाज्ञासिद्धमेवनपुनरत्रोपपत्त्यांतरमाधातव्यं॥ ॥अथुनाग्रहेषुदे-
शांतरसंस्कृतमंतरंसंप्रतिसंस्कर्तुमिलक्षसाधनेप्रधानभूतांभ्रयोमध्यरेखामेकेनविकीर्तितेनशास्त्रिन्यूनेनचाह॥ ॥तं
कांतःशरसूर्ययोजन०२५ गताकन्यार्थकांतीरदैः३२ खाभ्रखाष्ट८० मितैर्नरैस्तत्रसगरोमहीरक्षंदुर्गाः९५॥ पर्यंत्यष्ट-
सि८ रुद्ररत्नेदनागाः९० स्याद्दत्तरगुत्त्वंपुरंरक्षोरुजायिनीपुरंदस्रकाः९० तस्मात्कुरुक्षेत्रकं॥ ८३॥ ॥ तस्मान्मेरु-
योजनैरंतरंनागे८५ रेवंभूमेर्मध्यरेखानिरूपिता॥ ॥अत्रसगरपदेनलंकागासन्नमेकंदुर्गलोकेषुप्रसिद्धं॥ खाभिका-
र्त्तिकेयस्थानं॥ गतस्करक्षेत्राफल्गुतिदस्रकेनदक्षिणतोवास्थितेप्रतिपादनमितिज्ञातव्यं॥ रोषमुक्तं॥ अत्रोपपत्तिरत्नद्व-
याक्षंक्रांतरनुपतेन॥ यद्येकाग्रागपर्यंतेनपुरद्वयाक्षंक्रांतरेणचतुर्दस्रयोजनानितदुदिष्टंतत्रपुरद्वयांतरभूतैरंतैः कि
मितिं॥ उपपद्यतेततदंतरयोजनानि॥ यथोजायित्र्यक्षक्रांतयः २४ पर्यंत्यांपुनः९५ अंतरं ७ योजनानि६० बाहोः य
तोवस्वग्न्यांशैरुदपिदक्षिणतएवदस्रराशिर्योजनैः पर्यंतीक्षवति॥ एवमन्यत्रापी स्वपरिधावेतावत्वं॥ ॥एवमु

पजीव्यासिधौ प्रतिशतं देशांतरानयनमाह ॥ ॥ रेखापुरस्वनगरांतरयोजनाख्यैः खेचारिणां दिनगतिर्गुणिता विभक्ता ॥
स्वेष्टेनभूपरिधिनाप्तकलाधनर्णमध्यग्रहेनिजपुरेपरपूर्वसंस्थे ॥ ८४ ॥ ॥ रेखापुरस्वनगरांतरयोजनघ्नी खेचारिणां गतिः
स्वेष्टेनभूपरिधिनाप्तकलाधनर्णमध्यग्रहेकार्यइतियोजना ॥ स्वपुरप्राचीसंगतंयद्रेखापुरंतस्यस्वपुरस्याचार्ये
रेखांतियोजनानितेरिष्टग्रहस्यगतिर्गुणनीयावक्ष्यमाणेनस्वकभूपरिधिनाभाज्यापरिस्थैलब्धतुल्याः कलाग्रहेधनर्ण
णंवाकार्यइत्यर्थः ॥ धनर्णतांप्रयोजकमाह ॥ निजपुरइति ॥ रेखापुरात्यदित्यपुरंपश्चिमतः तदाधनमित्यथाऽऽगामित्यर्थः ॥
जत्रोपपत्तिः ॥ येमध्यमाः कृता स्तेकिललंकोदयिकाः ततस्तेषुचरफलसंस्कारेणस्वोदयिकैस्वमध्यंतरमापद्यते
यं ॥ यतउन्मंडलक्षावलयोरंतरंचरं ॥ तच्चतदेवंसंपद्यतेयदित्यपुरमपिमध्यरेखामनुलंघ्येवावश्यमानिष्टेन ॥ प्रकृते ॥
पुनःस्वपुरमंतरितमेवरेखातोधिकतरमध्येकदेशांतरमापन्नं ॥ ततश्चतुरमतिभिराचार्यैश्चरसंस्कारात्प्रथमतएवलंको
दयिकानामेषांस्वनिरक्षोदयिकत्वंकर्तुमारब्धंतत्रस्वापेक्षयापरमार्थतोलंकाग्रामपररेखायांयत्रदक्षिणदिग्विश्राम्य
तितदेवस्वाभंनिरक्षोनतुलंकैव ॥ तत्रप्रथमंस्वपुररेखापुरयोरंतरयोजनैरवलंकातः प्राक्स्थादिरेखातः प्राच्येवस्वपु
रमपि ॥ यदिचपश्चिमतस्तदातदपिप्रत्यगेव ॥ अतोलंकोदयिकास्तेस्वनिरक्षोदयिकादेशांतरकर्मणाकर्तुमारब्धाः
ततः स्वनिरक्षस्वभूगर्भक्षितिजयोरंतरेचरकालइतिचरसंस्कारेणानंतरंस्वोदयिकलाघनमप्युचितं ॥ अतोंतर

योजनैस्तदानयनमेवं ॥ तत्रदिक्साम्यनिवेशानुसारेणास्माच्चान्योन्तररेखयासहमध्यरेखायादक्षिणतोंतरमुपचीयते ॥ उत्तर
तोपचीयतइतिस्वपुररेखापुरयोरंतरयोजनेभ्योधिकान्येवलंकास्वनिरक्षयोरंतरयोजनानीतिप्रथमसमुपातेनरयादित्यदेशा
लंबज्ययैतावंतरंतेत्रिज्यातुल्ययाकिमितिलब्धानि ९२० तावंतरंतत्रिज्या ९२० तुल्ययाकिमितिलब्धानि २४ लंकास्वनिरक्ष
योरंतरयोजनानितत एषांतरयोजनैर्ग्रहभुक्तिर्गुणनीयातद्देशावच्छिन्नेनभूपरिधिनाभाज्येति ५००० २४ फलमादित्यस्य
देशांतरलिप्ताः ९ इतिकिलस्वरूपस्थितिः ॥ तदेतदाचार्यैः सोरशशांत्रियोगुणयेचफलसाम्योपलंभेनरेखास्वपुरांतरयोज
नैरेवगुणनंस्व १२ टपरिधिनाचभागहृत्यफलनिबद्धं ॥ ततआसांधनर्णतापपत्तिरपिस्वनिरक्षस्यस्वपुरस्यावलंकामध्य
रेखयोः पूर्वापरभावानुरोधादित्यनेनैव ॥ ॥ ननुतर्हिकथंभूपरिधेः स्फुटत्वंयदुपजीव्यंदेशांतरकर्मणीत्याशंक्येकयामातिन्या
स्फुटीकरणोपायमाह ॥ ॥ स्वपुरस्फुटनतांतर्योजनैर्योजनैः स्यात्परिधिरवनिगोलकाल्पितः प्रस्फुटोसौ ॥ अवनिपरिधिमान
लंबजीवाविनिघ्नंत्रिभवनगुणाप्तकंतस्यमानंनिरुक्तं ॥ ८५ ॥ ॥ योजनैर्लवैः स्वपुरस्फुटनतांतर्योजनैरवनिगोलपरिधिरु
पकल्पितोसावेवस्फुटइत्यन्वयः ॥ स्वपुरस्यस्फुटनतेतमेरुणासहयावदंतरंतैरेवस्वैरेवराशितः प्रकल्पितोयापरिधिः स्फु
टस्फुटइत्यर्थः ॥ तत्साधकमनुपातमाह ॥ अवनिपरिधिमानमिति ॥ यद्भुवनकोशाख्यार्णनाधिकारेगोक्षरवाक्षवलयाभवादि

लेत्यादिना५०५१भूमेः परिधिप्रमाणमुपन्यस्यतत्स्वदेशलंबज्यया संगुण्यत्रिज्याविभजेत्॥ फलंस्वदेशावच्छिन्नः स्फुटोभूपरिणा
हस्यादित्यर्थः॥ अत्रोपपत्तिरनुपातः॥ यदित्रिज्यातुल्यायालंबज्यानिरक्षदेशावच्छिन्नोचमवृत्तपरिधिस्फुटस्वदेशलंबज्ययाकृ इ
तिफलंस्फुटपरिधिरित्युपपन्नं॥ ॥अथस्वप्रतिपादितार्थसमर्थनायसांक्षिप्तायस्वयंतदर्थोपपादिकावासनायुक्तिनरनुच्छिन्ना
चमलोकेनरिष्युक्तामेवबुधाः॥ अतिक्षणमपिसादरमवलोकइष्यंतिनपुनः सहसेवप्रत्ययोत्पादनानर्हमितिविस्तरदुस्तरमन्यो
दितामितिमनसासंप्रधार्यदृष्टांतोक्तिविशेषेणप्रश्नसन्मथुरमाधवीमेकामाह॥ ॥प्रोक्तमयानिसृगमानसमीरितार्थ्यावासना
हृतिसृविस्फुतिरुंकयेह॥ संक्षिप्यबहुविधायपिवातिसोरस्वत्यंसुधांक्षुवलयंविबुधारसंज्ञाः॥८॥ ॥अथरससंज्ञाहेति
हेतुगर्भतेनवासतीयमानोर्थः॥ ॥अथोपसंहरन्नेवाधिकारांतरंतत्कारतयाशार्दूलविक्रीडितमाह॥ ॥इत्थंश्रीमन्नागनाथात्म
जेनप्रोक्तंतंत्रेशानराजेनरम्ये॥ ग्रंथागाराधारशुद्धेप्रसूतेसूर्यादीनांमध्यमानंनिरूपं॥८७॥ ॥इतिश्रीमत्सकलसिद्धांतवास
नाविचारचतुरप्रचुरतरापरशास्त्ररत्नस्यास्निग्धदेवज्ञज्ञानराजग्रथितसिद्धांतसुंदरवासनाभाष्येसुजनविचक्षणैकभूष्येग्रहा
नाधिराजसूनुपंडितचिंतामणिविरचितेग्रहगणितचिंतामणौमध्यगतिसाधनाधिकारः समाप्तः॥ ॥ ७ ॥ ॥
अथातः स्फुटगतिसाधनाध्यायोव्याख्यायते॥ ॥तत्रग्रथममेतदुपजीव्यभूतंमतिमद्भिरानंदसंदोहजननक्षेममतिविस्तरेण श्री
मध्यमाधिकारंविधिवद्ध्रुवस्थाप्यानुनासमस्तोत्तराधिकारार्थस्यसर्वस्यस्फुटतरस्वचरैकसापेक्षयापुनरुपजीव्यत्वानि ३५

